**दिनाङ्क :- 02.08.2024** **सायम् - 06:20**

## आदौ-मुख्यवार्ता:

- राष्ट्रपतिनः द्रौपदीमुर्मु इत्येतस्याः आध्यक्षे राज्यपालानां द्विदिवसीयसम्मेलनस्य आरम्भो जातः।
- केरलराज्ये वायनाडजनपदे अनेकेषु भूस्खलनप्रभावितक्षेत्रेषु अन्वेषणकार्याणि युद्धस्तरेण प्रचलन्ति। मृतकानां च संख्या त्रिशतं जाता।
- उत्तराखण्डराज्ये केदारनाथधाम्नि अवरुद्धान् तीर्थयात्रिणः सुरक्षितस्थानानि प्रत्यानेतुम् अद्य द्वितीयदिवसेऽपि साहाय्योद्धारकार्याणि विधीयन्ते।
- अमरिकादेशीयः राष्ट्रपतिः जो-बाइडनः आतंकवादिसमूहान् हमास-हिजबुल्लाह-हौथि इत्येतान् च विरुध्य इस्राइलदेशस्य सुरक्षार्थं स्वकीयां प्रतिबद्धतां प्रदर्शितवान्।
- **अपि च क्रीडावार्तासु**

- पेरिस-ओलम्पिकिति वैश्विकक्रीडाकुम्भे पदकद्वयविजेत्री मनुभाकरः पञ्चविंशतिमीटरात्मक-लक्ष्यवेधनस्पर्धायै चिता, भारतीयमिश्रितयुगल-शरसन्धानदलमपि प्रागुपान्त्यचक्राय चितम्।
- भारत-श्रीलङ्कयोर्मध्ये क्रीड्यमाने प्रथमे एकदिवसीयक्रिकेट-संघर्षे कोलम्बोनगरे प्रथमशः श्रीलङ्कादलं क्रीडति।

**राष्ट्रपतिः -राज्यपालसम्मेलनम्**

अद्य राष्ट्रपतिभवने द्विदिवसीयस्य राज्यपालानां सम्मेलनस्य आरम्भः जातः । राष्ट्रपतिः द्रौपदीमुर्मुः इत्येषा सम्मेलनस्य अध्यक्षतां करोति। एतत् राष्ट्रपतिनः द्रौपदी मुर्मूवर्यायाः आध्यक्षे राज्यपालानां प्रथमं सम्मेलनम् अस्ति। सर्वेषां राज्यानां राज्यपालाः एतस्मिन् सम्मेलने उपस्थितास्सन्ति। उपराष्ट्रपतिः जगदीपधनखडः, प्रधानमन्त्री नरेन्द्रमोदी अमितशाहः धर्मेन्द्रप्रधानः अश्विनी वैष्णवः डॉ.मनसुखमाण्डविया: अनेके केन्द्रीयमन्त्रिणः च सम्मेलनेऽस्मिन् उपस्थिताः सन्ति। सामाजिकसञ्चारपटले एकस्मिन् सन्देशे श्रीमोदी अलिखत् यत् अद्य प्रातःकाले असौ राज्यपालानां सम्मेलने भागम् अगृह्णात् इति। प्रधानमन्त्री अवदत् यत्, एतत् महत्त्वपूर्णं मञ्चम् अस्ति यस्मिन् राज्यपालाः कथं विकासस्य पोषणं कृत्वा समाजसेवाम् कर्तुं शक्नुवन्ति इति चर्चा जाता। नीत्यायोगस्य उपाध्यक्षः मुख्यकार्यकारी-अधिकारी अपि च

प्रधानमन्त्रिकार्यालयस्य अन्ये वरिष्ठाः अधिकारिणः, गृहमन्त्रालयस्य मन्त्रिमण्डलीयसचिवाश्च च भागं ग्रहीष्यन्ति।

सम्मेलनस्य कार्यसूच्यां त्रयाणाम् आपराधिकविधिनां कार्यान्वयनं, उच्चशिक्षायां परिमार्जनं विश्वविद्यालयानां प्रत्यायनम्, जनजातीयक्षेत्राणाम् आकाङ्क्षीमण्डलानां, खण्डानां च विकासः अपि च मायभारत- एकभारत् श्रेष्ठभारत्, एक-वृक्ष-मां-के-नाम इत्यादिषु अभियानेषु राज्यपालानां भूमिका प्राकृतिककृषिः इत्यादीनां क्षेत्राणां विकासः च समाविष्टाः सन्ति।

**<u>केरलभूस्खलनम्</u>**

केरलराज्ये वायनाड्जनपदे अनेकेषु भूस्खलितक्षेत्रेषु अन्वेषणकार्याणि युद्धस्तरेण प्रचलन्ति। मङ्गलवासरे घटितया अनया महत्या विपत्त्या अधुना यावत् प्रायशः त्रिशतं जनाः मृताः इति सूच्यते। सशस्त्रसेनायाः नेतृत्वे अन्वेषणकार्यस्य चतुर्थदिने पदवेट्टीकुन्नु-क्षेत्रात् चत्वारः जनाः सेनया अनया रक्षिताः। ये जीवितास्सन्ति तेषु एका महिला, एका बालिका च विमानेन नीता। सम्प्रति चुरलमाला- मुण्डकै-अट्टमाला- चालियार- इत्यादिषु सर्वाधिकप्रभावितप्रदेशेषु अन्वेषणाभियानं प्रचाल्यते । चत्वारिंशद्दलेषु

पञ्चदश अधिकाः रक्षकाः सन्ति। विलुप्तान् जनान् अन्वेष्टुं सर्वाः उपायाः करिष्यन्ते इति अधिकारिणः सूचितवन्तः। सम्प्रति वायनाड्-क्षेत्रे एकनवति सहाय्यशिबिरेषु नवसहस्राधिकाः जनाः निवसन्तः सन्ति

**उत्तराखण्ड्- केदारनाथतीर्थयात्रिणः**

उत्तराखण्ड्-राज्ये, केदारनाथधाम्नि अवरुद्धान् तीर्थयात्रिणः सुरक्षितस्थानानि प्रत्यानेतुम् अद्य द्वितीयदिवसे अपि साहाय्योद्धार-कार्याणि प्रचलन्ति। अद्यावधि केदारनाथात् चतुःसहस्रात् अधिकाः जनाः सुरक्षिततया रक्षिताः सन्ति। भारतीयसेनायाः चिनूक् - एम्.आई .-सप्तदश उदग्रविमानयोः साहाय्येन उद्धारकार्यं द्रुतगत्या प्रचलति इति आकाशवाण्याः वार्ताहरेण सूच्यते ।अत्र अद्यापि प्रायः पञ्चशताधिकाः तीर्थयात्रिणः अवरुद्धाः सन्ति।

**प्रधानः/सर्वोच्च न्यायालयः**

शिक्षामन्त्री धर्मेन्द्रप्रधानः उक्तवान् यत् नीट इति प्राक्स्नातकीय-परीक्षायां शुचितायाः किमपि प्रणाल्यानुसारम् उल्लंघन न क्रियते अतः पुनः परीक्षायाः आवश्यकता नास्तीती शीर्ष तमन्यायालस्य उक्तिः प्रशासनस्य दृष्टिकोणं पोषयति। एकस्मिन सामाजिकप्रसारतन्त्रजाले लिखिते सन्देशे श्रीप्रधानेन प्रोक्तं यत् सर्वकारः पक्षपातरहित-पारदर्शि-शून्यत्रुटियुतायै च परीक्षायै प्रतिबद्-धोऽस्ति। तेनोक्तं यत्

शुचितायाः सुनिश्चयाय प्रशासनेन विशेषज्ञानाम् उच्चस्तरीयसमित्याः कृतप्रस्तावाः शीघ्रातिशीघ्रतया अनुपालयिष्यन्ते।

## आन्तर्जालिक-सम्पर्क-दत्तांशः

भारतस्य पञ्चनवत्यधिकप्रतिशतत्सु ग्रामेषु सम्प्रति आन्तर्जालिकसुविधायै **3जी** उतोवा **4जी** इति दौरभाषिक-सम्पर्कः अस्ति। सञ्चारमन्त्रालयद्वारा प्रस्तुत विवरणानुसारं अस्य वर्षस्य अप्रैलमासान्तं यावत् त्रयोदशोत्तरषड्लक्षग्रामेषु अन्तर्जालस्य सम्प्राप्तिः अस्ति। मन्त्रालयेन एतदपि उक्तं यत् राष्ट्रे अन्तर्जालस्य ग्राहकाः गत दशवर्षेषु प्रतिवर्षं सपादचतुर्दशप्रतिशन्मिताधिकं प्रवर्ध्य षोडशलक्षोत्तरपञ्चविंशतिकोटितोऽपि अधिकं सञ्जातमस्ति। डाउनलोड इति अवतारण कर्तृ- देशेषु स्थानदृष्ट्यापि भारतं त्रिंशदधिकैकशतदेशेषु चतुर्दशोत्तरैकशत-क्रमाङ्कात् षोडषक्रमाङ्के समागतमस्ति।

## प्रधानमन्त्री-सम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्याम् कृष्यर्थशास्त्रिणां द्वात्रिंशत्तमस्य अन्ताराष्ट्रिय-सम्मेलनस्योद्घाटनं विधास्यति। अत्रावसरे असौ सम्मेलने उपस्थितान् अर्थशास्त्रिणः अपि सम्बोधयिष्यति। अस्य वर्षस्य सम्मेलनस्योद्देश्यं वर्तते-सतत्-कृषि खाद्य-प्रणाली प्रति परिवर्तनमिति। सम्मेलने वैश्विक-कृषि-सम्बद्ध-

समाहवनानि प्रति भारतस्य सकारात्मकदृष्टिकोणं प्रकाशयिष्यति। अपि च कृष्यनुसन्धाने नीतौ च देशस्य प्रगतिरपि प्रदर्शयिष्यते।

## बाइडेन-नेतन्याहू

अमरिकायाः राष्ट्रपतिः जो-बाइडनः ह्यः रात्रौ इस्राइल देशस्य प्रधानमन्त्रिणा बेंजामिन-नेतन्याहू इत्यनेन सह कृते दौरभाषिकसम्पर्के ईरानदेशीयानां सम्भावित-सङ्कटानां साम्मुख्यार्थं नूतन-अमेरिका-सैन्य-सन्नद्धाताविषये चर्चां चर्चितवान्। व्हाइट-हाउस इत्यनेन एकस्मिन् वक्तव्ये उक्तं यत् राष्ट्रपतिः जो-बाइडनः आतंकवादिसमूहान् हमास-हिजबुल्लाह-हौथि इत्येतान् च विरुध्य इस्राइल इत्यस्य सुरक्षार्थं स्वकीयां प्रतिबद्धतां प्रदर्शितवान्।

## पेरिस-ओलम्पिक

पेरिस-ओलम्पिकाख्ये क्रीडाकुम्भे अद्य सप्तमे दिवसे नैके भारतीयक्रीडकाः शरसन्धाने, लक्ष्यवेधने, बैडमिंटनक्रीडायां, जूडो इति द्वन्द्वे, हॉकीक्रीडायाम् , अन्याषु च क्रीडासु प्रातिभाग्यं सम्वहन्ति। अस्मिन् क्रीडाकुम्भे पदकद्वय-विजेत्री मनुभाकरः पञ्चविंशतिमीटरात्मक-लक्ष्यवेधनस्पर्धायै चिता, भारतीयमिश्रितयुगल-शरसंधानदलमपि चितम्। यत्र एकलपुरुषवर्गस्य बैडमिंटनस्पर्धायां प्रागुपान्तचक्रे लक्ष्यसेनः ताइपे-चाऊ-तियेन इत्यनेन सह क्रीडति। पुरुषहॉकी क्रीडायाञ्च

प्रारम्भिक-संघर्षे भारतीयदलं ऑस्ट्रेलियादलेन सह क्रीडति। ध्यातव्यमस्ति यत् हॉकीक्रीडायां भारतीयदलम् पूर्वमेव प्रागुपान्त्यचक्राय चितमस्ति।

**भारत-श्रीलङ्का**

भारत-श्रीलङ्कयोर्मध्ये क्रीड्यमाने संघर्षत्रयस्य प्रथमे संघर्षे श्रीलङ्कायाः कोलम्बोनगरे प्रथमशः क्रीडता श्रीलङ्कादलेन षण्णां क्रीडकानां हानौ सार्धैकशतधावनाङ्काः सन्ति विरचिताः। सप्तत्रिंशच्च कन्दूकप्रक्षेपणचक्राः सन्ति सम्पूरिताः। भारतीयदलं यदि अद्य जयं लभते तर्हि शततमो जयः भविष्यति, भारतस्य कञ्चिदपि देशं विरुध्य।